# सुभाषचन्द्रवसुः

[आधुनिक भारत के निर्माण में तथा शताब्दियों से सुप्त भारतीय जनता को स्वतन्त्रता प्राप्ति के लिए उत्साहित करने में नेताजी सुभाषचन्द्र बोस (वसु) का नाम स्वर्णाक्षरों में अंकित है। उन्होंने स्वाधीनता-प्राप्ति के लिए सैन्य-संगठन पर बहुत बल दिया तथा विदेश में 'आजाद हिन्द फौज' (Indian National Army) की स्थापना की। उनका प्रसिद्ध उद्‌बोधन था–तुम मुझे खून दो, मैं तुम्हें आजादी दूँगा। ओडिशा के कटक में 1897 ई. में जन्म लेनेवाले सुभाषचन्द्र वसु ने भारतीय प्रशासनिक सेवा की सर्वोच्च परीक्षा में उत्तीर्णता प्राप्त करके भी जन्मभूमि की सेवा के लिए उससे त्यागपत्र दे दिया था। विदेशों में रहकर इन्होंने भारतीय स्वतन्त्रता के लिए अनुपम कार्य किया था। 1945 ई. में विमान दुर्घटना में इनका देहावसान कहा जाता है किंतु कुछ लोगों को इस पर विश्वास नहीं। स्वतन्त्रता सेनानियों में एक पृथक् धारा के नेता होने से 'नेताजी' का विरुद केवल इन्हें ही प्राप्त है।]



भारतीयस्वाधीनतासंग्रामे सुभाषचन्द्रवसोः स्थानं नूनमनुपमं विद्यते। स तदानीन्तनस्य सत्याग्रहमार्गस्य परित्यागेन राष्ट्रवादिनं मार्गं शस्त्रधारणपरं स्वीकृतवान्। तस्य जन्म अधिवक्तुः जानकीनाथवसोः पुत्ररूपेण 23 जनवरी 1897 ई. वर्षे कटकनगरे बभूव। आरम्भतः एव मेधावी छात्रः सुभाषचन्द्रः राष्ट्रभक्तः आसीत्। अतएव कोलकातानगरे

प्रेसीडेन्सीकॉलेजे अधीयानः आंग्लाध्यापकम् ओटेनमहोदयं भारतस्य निन्दकं प्रताडितवान्, तस्माच्च संस्थानात् निष्कासितः। तदनु स्काटिशचर्चकालेजेऽधीयानः स कलकत्ता विश्वविद्यालयतः 1918 ई. वर्षे बी.ए. परीक्षामुत्तीर्णः। 1919 ई. वर्षे कैम्ब्रिज विश्वविद्यालयेऽधीयानः स भारतीयप्रशासनसेवायां (I.C.S) चतुर्थं स्थानं लब्धवान्।

भारतभूमिं सेवितुकामः तस्याः सेवायाः स त्यागमकरोत्। स्वराज-नामकस्य पत्रस्य सम्पादने निरतः स प्रान्तीयकांग्रेससमितेः प्रचाराधिकारी जातः। 1923 ई. वर्षे सुभाषचन्द्रः अखिलभारतीयस्य युवाकांग्रेसस्य अध्यक्षः बभूव। 1925 ई. वर्षे राष्ट्रवादितया स बन्दीकृतः, माण्डले कारागारे निबद्धः यत्र क्षयरोगेण आक्रान्तोऽपि जातः। वर्षद्वयानन्तरं स कारागारान्मुक्तः कांग्रेसदलस्य सचिवो जातः। 1930 ई० वर्षे स कोलकातानगरनिगमस्य महापौरः (मेयर) जातः। 1939 ई. वर्षे स अखिलभारतीयकांग्रेसदलस्य अध्यक्षः निर्वाचितः। किन्तु मुख्यधारया सह विवादेन त्यागपत्रमसौ दत्तवान्।

ततः सुभाषचन्द्रः 1939 ई. वर्षे (22 जून दिवसे) "ऑल इण्डिया फार्वर्ड ब्लॉक" इति संस्थायाः स्थापनं कृतवान्। 1941 ई. वर्षे गृहे एवं बन्दीभूतः सुभाषः प्रच्छन्नरूपेण निर्गतः। अफगानिस्तानादि देशान् अतीत्य स जर्मनीराजधानीं गतः यत्र विश्वयुद्धस्य प्रतिनेतुः हिटलरस्य सान्निध्यं प्राप्तः। कालान्तरेण जापानदेशेन सह मैत्रीं प्राप्य स सिंगापुरं गतः यत्र आजादहिन्दफौजनामकस्य सैन्यसंघटनस्य स्थापनां कृतवान्। बहवः भारतीयसैनिकाः तस्य संघटने आगताः ब्रिटिशसैनिकैः सह युद्धं कृतवन्तः। अनेनैव क्रमेण विश्वयुद्धसमाप्तिकाले 18 अगस्त दिवसे 1945 ई. वर्षे सुभाषचन्द्रस्य विमान-दुर्घटनायां निधनं जातम्। अद्यापि केचन जनाः दुर्घटनायां तस्य निधने न विश्वसन्ति। 1992 ई. वर्षे सुभाषचन्द्रः मरणोत्तरं "भारतरत्नम्" इत्युपाधिना अलंकृतः। वस्तुतः स्वकीयस्य विशिष्टस्य राजनीतिदर्शनस्य कृते सुभाषचन्द्रः महत्त्वं लभते।

**शब्दार्थाः –**

| | | |
|---|---|---|
| स्वाधीनतासंग्रामे | = | स्वाधीनता की लड़ाई में |
| नूनमनुपमम् | = | (नूनम् + अनुपमम्) निश्चित रूप से अनुपम |
| विद्यते | = | विद्यमान है |
| तदानीन्तनस्य | = | उस समय का |
| सत्याग्रहमार्गस्य | = | सत्याग्रह के रास्ते का |
| परित्यागेन | = | छोड़ देने से |
| शस्त्रधारणपरम् | = | शस्त्र उठाने का, हिंसा का |
| स्वीकृतवान् | = | स्वीकार किया |
| अधिवक्तुः | = | अधिवक्ता का, वकील का |
| बभूव | = | हुआ (भू + लिट् लकार) |
| आरम्भतः | = | आरम्भ से |
| अधीयानः | = | अध्ययन करते हुए (अधि + इङ् + शानच्) |
| आंग्लाध्यापकम् | = | अंग्रेज अध्यापक को |
| प्रताडितवान् | = | पीटा, अपमानित किया |
| तस्माच्च | = | (तस्मात्+च) और उसके कारण |
| निष्कासितः | = | निष्कासित हुआ / निकाला गया |
| स्काटिशचर्चकालेजे | = | स्काटिश चर्च कालेज में |
| लब्धवान् | = | प्राप्त किया |
| सेवितुकामः | = | सेवा करने की इच्छा रखनेवाला |

| | | |
|---|---|---|
| निरतः | = | संलग्न, लगा हुआ |
| प्रान्तीयकांग्रेससमितेः | = | प्रान्तीय कांग्रेस समिति का |
| राष्ट्रवादितया | = | राष्ट्रवादी होने के कारण |
| बन्दीकृतः | = | बंदी बनाया गया/बनाये गये |
| निबद्धः | = | बाँधा गया, रखा गया/रखे गये |
| क्षयरोगेण | = | क्षयरोग (टी. बी.) से |
| आक्रान्तोऽपि | = | आक्रान्त (ग्रस्त) होकर भी |
| जातः | = | हुआ/हुए |
| वर्षद्वयानन्तरम् | = | दो वर्ष बाद |
| कारागारान्मुक्तः | = | कारागार (जेल) से मुक्त |
| दत्तवान् | = | दिया |
| प्रच्छन्नेरूपेण | = | छिपे रूप में, वेष बदल कर |
| निर्गतः | = | निकल गया/गये |
| अतीत्य | = | पार कर के |
| प्रतिनेतुः | = | विरोधी नेता का |
| सान्निध्यम् | = | समीपता, निकटता, उपस्थिति |
| कालान्तरेण | = | दूसरे समय में, कालक्रम से |
| संघटने | = | संगठन (प्रबन्धन) में |
| कृतवन्तः | = | (उन्होंने) किया |
| अनेनैव (अनेन + एव) | = | इसी से |
| मरणोत्तरम् | = | मरने के बाद |

| | | |
|---|---|---|
| अलंकृतः | = | विभूषित किया गया/ किये गये |
| स्वकीयस्य | = | अपना |
| विशिष्टस्य | = | विशेष, दूसरों से अलग |
| लभते | = | पाता है |

**सन्धिविच्छेदः –**

| | | |
|---|---|---|
| स्वाधीनता | = | स्व+अधीनता (दीर्घ-सन्धि) |
| सत्याग्रहः | = | सत्य+आग्रहः (दीर्घ-सन्धि) |
| आंग्लाध्यापकम् | = | आंग्ल+अध्यापकम् (दीर्घ-सन्धि) |
| तस्माच्च | = | तस्मात्+च (व्यञ्जनसन्धि) |
| प्रचाराधिकारी | = | प्रचार+अधिकारी (दीर्घ-सन्धि) |
| वर्षद्वयानन्तरम् | = | वर्षद्वय+ अनन्तरम् (दीर्घ-सन्धि) |
| कारागारान्मुक्तः | = | कारागारात्+मुक्तः (व्यञ्जनसन्धि) |
| अनेनैव | = | अनेन+एव (वृद्धि सन्धि) |
| अद्यापि | = | अद्य+अपि (दीर्घ-सन्धि) |
| इत्युपाधिना | = | इति+उपाधिना (यण् सन्धि) |

**प्रकृति-प्रत्यय विभागः –**

| | | |
|---|---|---|
| विद्यते | = | $\sqrt{\text{विद्}}$, लट् लकार प्रथम पुरुष, एकवचन, आत्मनेपदी |
| कृतवान् | = | $\sqrt{\text{कृ}}$ + क्तवतु |
| बभूव | = | $\sqrt{\text{भू}}$, लिट् लकार, प्र. पु., एकवचन |
| अधीयानः | = | अधि+ $\sqrt{\text{इ}}$ + शानच् |
| प्रताडितवान् | = | प्र + $\sqrt{\text{ताड}}$ +क्तवतु |

| | | |
|---|---|---|
| लब्धवान् | = | √लभ् + क्तवतु |
| निरतः | = | नि + √रम् + क्त |
| निबद्धः | = | नि + √बन्ध् + क्त |
| अतीत्य | = | अति+ √इ + ल्यप् |
| प्रतिनेतुः | = | प्रति + √नी + तृच् षष्ठी, एकवचन |
| लभते | = | √लभ् , लट् लकार, प्र. पु., एकवचन, आत्मनेपदी |
| कृतवन्तः | = | √कृ + क्तवतु प्रथमा, बहुवचन (पुं.) |

## अभ्यासः

### (मौखिकः)

1. **एकपदेन उत्तरं वदत–**

(क) सुभाषचन्द्रवसोः जन्म कदा अभवत् ?

(ख) सुभाषचन्द्रवसोः जन्म कुत्र अभवत् ?

(ग) सुभाषचन्द्रवसुः कस्मात् कॉलेजात् निष्कासितः ?

(घ) सुभाषचन्द्रवसुः कस्मिन् वर्षे भारतीयप्रशासनसेवायां चितः ?

(ङ) सः कदा अखिलभारतीयकांग्रेसदलस्य अध्यक्षः निर्वाचितः ?

2. **अधोलिखितानां पदानां प्रत्ययं वदत–**

कृतवान्, लब्धवान्, प्राप्तवान्, जातः, प्राप्तः, आगम्य, दृष्ट्वा, गन्तुम् ।

3. **अधोलिखितानां पदानां विभक्तिं वदत–**

संग्रामे, मार्गस्य, तस्मात्, देशम्, सेवायाः, कारागारे, कांग्रेसस्य, वर्षे ।

4. **निम्नाङ्कितेसु क्रियापदेषु कः धातुः कः च पुरुषः इति वदत –**

अभवत्, आसीत्, पश्यामः, कथ्यते, पठतु, गच्छानि ।

## (लिखितः)

1. **एकपदेन उत्तरत –**

(क) सुभाषस्य जन्म कुत्र अभवत् ?

(ख) स कुत्र आजादहिन्दफौजनामकस्य सैन्यसंघटनस्य स्थापनां कृतवान् ?

(ग) सुभाषचन्द्राय कदा भारतरत्नं दत्तम् ?

(घ) सुभाषः कस्मिन् वर्षे कोलकातानगरनिगमस्य महापौरः जातः ।

(ङ) कस्मिन् वर्षे गृहे एव सुभाषः बन्दीभूतः जातः ?

2. **रिक्तस्थानानि पूरयत–**

(क) सः .......... वर्षे बी. ए. परीक्षामुत्तीर्णः ।

(ख) ............... नगरे सुभाषस्य जन्म अभवत् ।

(ग) ................. वर्षे गृहात् प्रच्छन्नरूपेण निर्गतः ।

(घ) हिटलरस्य .............. प्राप्तः ।

(ङ) सुभाषचन्द्रस्य ............. निधनं जातम् ।

3. सुमेलनं कुरुत–

| 'अ' | 'आ' |
|---|---|
| (क) सुभाषस्य जन्म | (i) 1992 |
| (ख) बी. ए. उत्तीर्णः सुभाषः | (ii) 1945 |
| (ग) सुभाषस्य युवाकांग्रेसस्य अध्यक्षतालाभः | (iii) 1897 |
| (घ) सुभाषस्य विमान-दुर्धटनायां निधनम् | (iv) 1923 |
| (ङ) सुभाषस्य मरणानन्तरं भारतरत्नोपाधिः | (v) 1918 |

4. अधोलिखितेषु रेखांकितपदेषु विभक्तिं लिखत –

(क) तस्य जन्म कटकनगरे बभूव।

(ख) स माण्डले कारागारे निबद्धः।

(ग) सः सत्याग्रहमार्गं परित्यक्तवान्।

(घ) सुभाषचन्द्रः "ऑल इण्डिया फॉर्वर्ड ब्लॉक" इति संस्थायाः स्थापनं कृतवान्।

(ङ) तस्मात् संस्थानात् निष्कासितः।

5. वाक्यप्रयोगं कुरुत–

अपि, एव, तस्याः, सह, अतएव, तत्र, कुत्र, च

6. अधोलिखितेषु क्रियापदेषु लकारं, पुरुषं, वचनं च लिखत :

| क्रियापदम् | लकारः | पुरुषः | वचनम् |
|---|---|---|---|
| आसीत् | | | |
| अकरोत् | | | |
| लभते | | | |
| विद्यते | | | |
| भविष्यति | | | |

## योग्यताविस्तारः

1947 ई. में भारत अंग्रेजों की पराधीनता से मुक्त हुआ। आज की पीढ़ी इतिहास में पढ़ना पड़ता है कि स्वाधीनता के लिए भारत के निवासियों को कितना सं करना पड़ा था। एक प्रकार से 1857 में ही स्वतंत्रता-संग्राम के लिए भारतीयों ने श धारण किया था किंतु असंगठित संघर्ष के कारण वह संग्राम असफल हो गया। कां की स्थापना (1885 ई.) के बाद स्वतंत्रता के लिए संघर्ष एक संगठित रूप में होने लग इसमें भी क्रमशः दो दल हो गए जिन्हें "गरम दल" और "नरम दल" कहा जाता बालगंगाधर तिलक गरम दल के नेता थे जबकि मोतीलाल नेहरू आदि नरम दल पक्षधर थे। महात्मा गाँधी के स्वतंत्रता-संग्राम में कूदने पर असहयोग आन्दो (1921 ई.) आरम्भ हुआ। उन्होंने सविनय अवज्ञा, सत्याग्रह और अहिंसा पर बल दि जिसे भारतीय राष्ट्रीय कांग्रेस ने स्वीकार कर लिया किंतु इस सिद्धान्त के भी विरोधी कांग्रेस में वर्तमान थे। उन्होंने राष्ट्रवाद की उद्घोषणा करते हुए तत्काल स्वाधीनता मांग रखी,चाहे हिंसा का ही मार्ग पकड़ना पड़े। अंग्रेजों की दमनात्मक नीति का परिणाम होना था। ऐसे क्रान्तिकारियों में सरदार भगत सिंह, चन्द्रशेखर आजाद, राज आदि प्रमुख युवक थे। उन्हें अंग्रेजों ने बलपूर्वक समाप्त किया।

नेताजी सुभाषचन्द्र बोस यद्यपि कांग्रेस के नेता थे किन्तु अपने राष्ट्रवाद के क महात्मा गाँधी जैसे नेताओं से मतभेद रखते थे। कांग्रेस के एक अधिवेशन में मह गाँधी द्वारा समर्थित प्रत्याशी को निर्वाचन में हरा कर वे स्वयं अध्यक्ष पद पर चुने ग तदनन्तर उन्होंने द्वितीय विश्वयुद्ध के समय अंग्रेजों के विरुद्ध संघर्ष करते हुए विदेश सैन्य संगठन किया। यद्यपि उनका स्वतंत्र राजनीतिक दर्शन था किंतु उनके अनु भारतीयों ने उन्हें "नेताजी" का प्रतिष्ठित विरुद्ध (उपाधि) प्रदान किया।

◆◆◆

# सूर्यस्य महिमा

[आकाशीय पिण्डों में सर्वाधिक भास्वर तथा पृथ्वी के लिए हितकारक सूर्य हैं। सूर्य की महत्ता के कारण इन्हें अनेक संस्कृतियों में देवता का रूप दिया गया है तथा इनके विषय में अनेक पौराणिक कथाएँ गढ़ी गयी हैं। इन कथाओं को छोड़ भी दें तो सूर्य के वैज्ञानिक महत्त्व की उपेक्षा नहीं हो सकती। हमारी पृथ्वी के लिए सूर्य की किरणें तथा ताप बहुत लाभदायक है। अब तो वैज्ञानिकों ने सौर ऊर्जा का उत्पादन आरम्भ किया है। सूर्य से मेघ, वनस्पति तथा समस्त प्राणिजगत् लाभान्वित होता है। पृथ्वी पर ऋतुपरिवर्तन सूर्य के कारण ही होता है। संस्कृत में सूर्य के अनेक नामों की प्रकल्पना है। प्रस्तुत पाठ के प्रत्येक पद्य में उनके पृथक्-पृथक् नाम आये हैं।]



1. नक्षत्ररूपः सूर्योऽयं स्वप्रकाशेन दीप्तिमान्।
   चन्द्रादीनां ग्रहाणां च प्रकाशकः इति स्थितः॥
2. अहोरात्रं विभजते महास्त्रोतस्तथोर्जसः।
   सङ्क्रान्तिहेतुना मासानृतूँश्च तनुते रविः।
3. समीपत्वाद् वसन्तं च ग्रीष्मं वर्षाः करोत्ययम्।
   शरद्-हेमन्त-शिशिराण्यतथात्वे विभाकरः॥

4. प्राणिनां स्वास्थ्यलाभाय किरणास्तु दिवामणेः ।
सर्वदा कल्पिताः सर्वैर्भिषग्भिश्च विशेषतः ॥

5. भास्करस्योर्जसा नं क्रान्तिर्वैज्ञानिकी भवेत् ।
इत्येव साम्प्रतं शोधक्षेत्रे कार्यं प्रवर्तते ॥

6. यथा यन्त्रादिगतये विद्युदुत्पादनाय च ।
रोगादिशमने भानोर्भानवः शक्तिशालिनः ॥

7. पादपाः विकसन्त्येव प्रकाशे हि विभावसोः ।
जायन्ते नान्यथा तेषु पुष्पाणि च फलानि च ॥

8. रूपदो यत्त्वरूपाय ज्ञानदोऽज्ञानिने तथा ।
सर्वेषां जीवनं प्रोक्तः सहस्रांशुरनेकधा ॥

9. तद्रश्मिसेवनं सूर्यस्नानं जगति कथ्यते ।
देहास्थि-रक्षणार्थं यत्त्वग्रोगस्य निवारणे ॥

10. पुरा प्रभाकरो देवो व्रताय परिकल्पितः ।
स्नाने तथार्घ्यदानाय विहारेऽस्मिन् विशेषतः ॥

**शब्दार्थाः :**

| | | |
|---|---|---|
| नक्षत्ररूपः | = | नक्षत्र के रूप में वर्तमान |
| सूर्योऽयम् (सूर्यः + अयम्) | = | यह सूर्य |
| स्वप्रकाशेन | = | अपने प्रकाश से |
| दीप्तिमान् | = | चमकनेवाला, प्रकाशित होनेवाला |
| चन्द्रादीनाम् | = | चन्द्र आदि का |
| ग्रहाणाम् | = | ग्रहों का |

च = और, तथा

प्रकाशक = प्रकाशित करनेवाला

इति = ऐसा

स्थितः = (स्थित) है

अहोरात्रम् = दिन और रात (को)

विभजते = बाँटता है, विभाजित करता है, अलग करता है

महास्रोतस्तथोर्जसः (महास्रोतः + तथा + ऊर्जसः) = महास्रोत = बहुत बड़ा स्रोत; तथा = और; ऊर्जसः = ऊर्जा का

सङ्क्रान्तिहेतुना = संक्रान्ति के कारण, एक स्थान से दूसरे स्थान पर गमन द्वारा, स्थानान्तरण द्वारा

मासानृतूँश्च (मासान् + ऋतून् + च) = महीनों और ऋतुओं को

तनुते = जन्म देता है, उत्पन्न करता है

रविः = सूर्य

समीपत्वाद् = समीप होने के कारण

वसन्तम् = वसन्त (ऋतु) के कारण

ग्रीष्मम् = ग्रीष्म (ऋतु) को

वर्षाः = वर्षा (ऋतु) को

करोत्ययम् (करोति+अयम्) = करोति = करता है, अयम् = यह

| | | |
|---|---|---|
| शरद्–हेमन्त–शिशिराणि | = | शरद्, हेमन्त, शिशिर नामक ऋतुओं को |
| अतथात्वे | = | वैसा न होने पर अर्थात् दूर रहने पर |
| विभाकरः | = | सूर्य |
| प्राणिनाम् | = | प्राणियों, जीवों के |
| स्वास्थ्यलाभाय | = | स्वास्थ्य लाभ के लिए |
| किरणास्तु (किरणाः तु) | = | किरणें तो |
| दिवामणेः | = | सूर्य की |
| सर्वदा | = | सदा, हमेशा |
| कल्पिताः | = | माने गए हैं |
| सर्वैर्भिषग्भिश्च (सर्वैः + भिषग्भिः + च) | = | और सभी वैद्यों (चिकित्सकों) के द्वारा |
| विशेषतः | = | विशेष रूप से |
| भास्करस्योर्जसा (भास्करस्य + ऊर्जसा) | = | सूर्य की ऊर्जा से |
| नूनम् | = | अवश्य, निश्चित रूप से |
| क्रान्तिर्वैज्ञानिकी (क्रान्तिः + वैज्ञानिकी) | = | वैज्ञानिक क्रांति |
| भवेत् | = | होगा/ होगी, हो सकता है |
| इत्येव (इति + एव) | = | ऐसा ही |
| साम्प्रतम् | = | आजकल |
| शोधक्षेत्रे | = | शोध या अनुसंधान के क्षेत्र में |

| | | |
|---|---|---|
| कार्य प्रवर्तते | = | कार्य चल रहा है |
| यथा | = | जैसे |
| यन्त्रादिगतये | = | यन्त्र आदि चलाने के लिए |
| विद्युदुत्पादनाय | = | विद्युत् (बिजली) उत्पादन के लिए |
| रोगादिशमने | = | रोग आदि के नाश के लिए |
| भानोः | = | सूर्य की |
| भानवः | = | किरणें |
| शक्तिशालिनः | = | शक्तिशाली, प्रभावपूर्ण |
| पादपाः | = | पेड़ –पौधे |
| विकसन्त्येव (विकसन्ति + एव) | = | विकास करते हैं |
| एव | = | ही (अव्यय) |
| विभावसोः | = | सूर्य के |
| जायन्ते | = | उत्पन्न होते हैं |
| नान्यथा (न + अन्यथा) | = | अन्य प्रकार से नहीं |
| तेषु | = | उनमें |
| रूपदः | = | रूप प्रदान करने वाला |
| यत् + तु | = | यह तो |
| ज्ञानदोऽज्ञानिने | = | अज्ञानी को ज्ञान देने वाला |
| अरूपाय | = | रूप (आकार) से रहित वस्तु को |
| तथा | = | वैसे |

सर्वेषाम् = सभी का, सब का

जीवनम् = जीवन, जीवनदाता

प्रोक्तः = कहा गया है

सहस्रांशुरनेकधा (सहस्रांशुः + अनेकधा) =

सहस्रांशुः = सूर्य (हजार किरणों वाला)

अनेकधा = अनेक प्रकार से

तद्रश्मिसेवनम् = उसकी किरणों का सेवन

सूर्यस्नानम् = सूर्यस्नान, धूप में बैठना

जगति = संसार में

कथ्यते = कहा जाता है

देहास्थि (देह + अस्थि) = शरीर की हड्डी

रक्षणार्थम् = रक्षा के लिए

यत्त्वग्रोगस्य

(यत् + त्वक् + रोगस्य) = जो त्वचा के रोग का, चर्मरोग

निवारणे = दूर करने में

पुरा = प्राचीन काल में, बहुत पहले

प्रभाकरः देवः = प्रभाकर देवता, सूर्य

व्रताय = व्रत के लिए

| | | |
|---|---|---|
| परिकल्पित: | = | माना गया/माने गये |
| स्नाने | = | स्नान में |
| तथार्घ्यदानाय | = | वैसा ही अर्घ्यदान के लिए |
| विहारेऽस्मिन् | = | इस बिहार राज्य में |
| विशेषत: | = | विशेष रूप से |

## व्याकरणम्

**सन्धि: –**

| | | |
|---|---|---|
| सूर्योऽयम् | = | सूर्य: + अयम् (विसर्गसन्धि:, पूर्वरूपसन्धि:) |
| चन्द्रादीनाम् | = | चन्द्र + आदीनाम् (दीर्घसन्धि:) |
| महास्रोतस्तथोर्जस: | = | महास्रोत : + तथा + ऊर्जस: (विसर्गसन्धि:, गुणसन्धि:) |
| मासानृतूँश्च | = | मासान् + ऋतून् + च (व्यञ्जनसन्धि:) |
| करोत्ययम् | = | करोति + अयम् + (यण्सन्धि:) |
| किरणास्तु | = | किरणा: + तु (विसर्गसन्धि:) |
| शिशिराण्यतथात्वे | = | शिशिराणि + अतथात्वे (यण्सन्धि:) |
| सर्वैर्भिषग्भिश्च | = | सर्वै: + भिषग्भि: + च (विसर्गसन्धि:) |
| भास्करस्योर्जसा | = | भास्करस्य + ऊर्जसा (गुणसन्धि:) |
| क्रान्तिर्वैज्ञानिकी | = | क्रान्ति : + वैज्ञानिकी (विसर्गसन्धि:) |
| इत्येव | = | इति + एव (यण्सन्धि:) |

| | | |
|---|---|---|
| यन्त्रादिगतये | = | यन्त्र + आदि - गतये (दीर्घसन्धिः) |
| विद्युदुत्पादनाय | = | विद्युत् + उत्पादनाय (व्यञ्जनसन्धिः) |
| भानोर्भानवः | = | भानोः + भानवः (विर्सगसन्धिः) |
| विकसन्त्येव | = | विकसन्ति + एव (यण्सन्धिः) |
| नान्यथा | = | न + अन्यथा (दीर्घसन्धिः) |
| रूपदोयत्त्वरूपाय | = | रूपदः + यत् तु + अरूपाय (विसर्गसन्धिः, यण्सन्धिः) |
| ज्ञानदोऽज्ञानिने | = | ज्ञानदः + अज्ञानिने (विसर्गसन्धिः, पूर्वरूपसन्धिः) |
| सहस्रांशुरनेकधा | = | सहस्र + अंशुः + अनेकधा (दीर्घ सन्धिः, विसर्ग सन्धिः) |
| तद्रश्मिसेवनम् | = | तत् + रश्मि + सेवनम् (व्यञ्जनसन्धिः) |
| देहास्थि | = | देह + अस्थि (दीर्घसन्धिः), |
| यत्त्वग्रोगस्य | = | यत् + त्वक् + रोगस्य (व्यञ्जनसन्धिः) |
| तथार्घ्यदानाय | = | तथा + अर्घ्यदानाय (दीर्घसन्धिः) |
| विहारेऽस्मिन् | = | बिहारे + अस्मिन् (पूर्वरूपसन्धिः) |

## पद्यानाम् अन्वयः

1. अयं सूर्यः नक्षत्ररूपः स्वप्रकाशेन दीप्तिमान् । चन्द्रादीनां ग्रहाणां च प्रकाशकः इति स्थितः ।

2. ऊर्जसः महास्रोत : (सः) अहोरात्रं विभजते । सङ्क्रान्तिहेतुना रविः मासान् ऋतून् च तनुते ।

3. (पृथिव्याः) समीपत्वाद् अयं विभाकरः वसन्तं ग्रीष्मं वर्षाः च करोति । अतथात्वे (दूरे जाते) शरद्-हेमन्त-शिशिराणि (च करोति ) ।

4. दिवामणेः किरणाः तु प्राणिनां स्वास्थ्यलाभाय (सन्ति) । विशेषतः सर्वैः भिषग्भिः सर्वदा (एवं ) कल्पिता : ।

5. भास्करस्य ऊर्जसा नूनं वैज्ञानिकी क्रान्तिः भवेत् । साम्प्रतम् इत्येव कार्यं शोधक्षेत्रे प्रवर्तते ।

6. यथा (सूर्यः) यन्त्रादिगतये विद्युदुत्पादनाय च (आवश्यकः) तथैव शक्तिशालिनः भानोः भानवः रोगादिशमने (आवश्यकाः) ।

7. विभावसोः प्रकाशे हि पादपाः विकसन्ति । अन्यथा तेषु पुष्पाणि फलानि च न जायन्ते ।

8. यत् तु अरूपाय रूपदः तथा अज्ञानिने ज्ञानदः सहस्रांशुः सर्वेषां जीवनम् अनेकधा प्रोक्तः ।

9. जगति तद् रश्मिसेवनं सूर्यस्नानं कथ्यते । यत् देहास्थि-रक्षणार्थं त्वक् रोगस्य निवारणे (समर्थम्) ।

10. पुरा व्रताय प्रभाकरो देवः परिकल्पितः । विशेषतः अस्मिन् विहारे स्नाने तथा अर्घ्यदानाय ।

## प्रकृति-प्रत्यय-विभागः -

| | | |
|---|---|---|
| दीप्तिमान् | = | $\sqrt{\text{दीप्}}$ + क्तिन् + मतुप्, पुँ., प्रथमा, एकवचनम् |
| स्थितः | = | $\sqrt{\text{स्था}}$ + क्त, पुँ., एकवचनम् |
| विभजंते | = | वि + $\sqrt{\text{भज्}}$ , आत्मनेपदी, प्रथमपुरुषः, एकवचनम् |
| तनुते | = | $\sqrt{\text{तन्}}$ आत्मनेपदी, प्रथमपुरुषः, एकवचनम् |

| | | |
|---|---|---|
| करोति | = | √कृ, लट्लकारः, प्रथमपुरुषः, एकवचनम् |
| कल्पिताः | = | कल्प् + क्त, प्रथमा, बहुवचनम् |
| भवेत् | = | √भू विधिलिङ्लकारः, प्रथमपुरुषः, एकवचनम् |
| प्रवर्तते | = | प्र + √वृत् आत्मनेपदी, प्रथमपुरुषः, एकवचनम् |
| गतये | = | √गम् + क्तिन्, चतुर्थी, एकवचनम् |
| जायन्ते | = | √जन् + आत्मनेपदी, लट्लकारः, प्रथमपुरुषः, बहुवचनम् |
| प्रोक्तः | = | प्र + √वच् क्त पुँ., एकवचनम् |
| कथ्यते | = | √कथ कर्मवाच्य, प्रथमपुरुषः, एकवचनम् |

## अभ्यासः

### मौखिकः

**1. अधोलिखितानां पदानाम् उच्चारणं कुरुत–**

सूर्योऽयम्, महास्रोतस्तथोर्जसः, मासानृतूँश्च, करोत्ययम्, शिशिराण्यतथात्वे, सर्वैर्भिषग्भिश्च, भास्करस्योर्जसा, विद्युदुत्पादनाय, विकसन्त्येव, यत्त्वरूपाय, सहस्रांशुरनेकधा, तद्रश्मिसेवनम्, यत्त्वग्रोगस्य ।

**2. निम्नलिखितानां पदानाम् अर्थं वदत–**

अहोरात्रम्, ऊर्जसः सङ्क्रान्तिहेतुना, मासानृतूँश्च, सर्वैर्भिषग्भिश्च, भास्करस्योर्जसा, रूपदः, ज्ञानदः ।

## लिखित:

**1. अधोलिखितानि पदानि लिखत–**

नक्षत्ररूप:, चन्द्रादीनाम्, सङ्क्रान्तिहेतुना, समीपत्वाद्, स्वास्थ्यलाभाय, क्रान्तिवैज्ञानिकी, भानोर्भानव: ज्ञानदोऽज्ञानिने, तथार्घ्यदानाय ।

**2. निम्नलिखितानां पदानां सन्धिं सन्धिविच्छेदं वा कुरुत –**

(क) सूर्योऽयम् = ......................

(ख) मासानृतूँश्च = ......................

(ग) सर्वै: + भिषग्भि: + च = ......................

(घ) भास्करस्य + ऊर्जसा = ......................

(ङ) यत् + त्वक् + रोगस्य = ......................

**3. अधोलिखितानां प्रश्नानाम् उत्तरम् एकपदेन लिखत–**

(क) नक्षत्ररूप: स्वप्रकाशेन दीप्तिमान् क: ?

(ख) क: अहोरात्रं विभजते ?

(ग) सूर्य: कथं मासानृतूँश्च तनुते ?

(घ) सूर्य: कस्य महास्रोत : ?

(ङ) कस्य प्रकाशे पादपा: विकसन्ति ?

**4. अधोलिखितेषु कोष्ठपदेन उचितं पदं चित्वा रिक्तस्थानं पूरयत:**

(क) ग्रहाणां प्रकाशक: ............... । (सूर्य:/ चन्द्र:)

(ख) वसन्त: ग्रीष्म: वर्षा: च भवन्ति सूर्यस्य पृथिव्या: .......... ।

(समीपत्वाद्/दूरत्वाद्)

(ग) रोगादिशमने मुख्यत: ........... अपेक्षित: । (चन्द्रकिरणा:/भानोर्भानव:)

(घ) पुराकाले प्रभाकरः देवः ........... कल्पते स्म । (धर्माय/व्रताय)

(ङ) अरूपाय रूपदः ............. (रविः / कविः) ।

**5. वाक्यनिर्माणं कुरुत– सूर्यः अहोरात्रम्, फलानि, कथ्यते, भवति**

**6 सूर्य का जीव–जगत् में क्या महत्त्व है ?**

## योग्यता–विस्तारः

सूर्य आकाशीय पिण्डों में सर्वाधिक भास्वर अग्निपिण्ड है । पृथ्वी के लिए सर्वाधिक महत्त्वपूर्ण भी है । यही कारण है कि प्राचीन काल में विभिन्न संस्कृतियों में इसे पूज्य देवता की श्रेणी दी गयी थी । सूर्य की किरणें प्रकाश, ताप तथा आरोग्य प्रदान करती हैं । प्राचीन भारत में सूर्य की उपासना होती थी जो परम्परा अभी भी चल रही है । सूर्य के अनेक स्तोत्र संस्कृत भाषा में लिखे गये हैं । सूर्य के विभिन्न नाम उसकी महत्ता का प्रतिपादन करते हैं । संस्कृत में एक स्तोत्र तो सूर्य के सहस्र नामों का उल्लेख करता है । भविष्य पुराण में सूर्य की महत्ता दी गयी है । इसी प्रकार मयूरभट्ट का सूर्यशतक क्लिष्ट संस्कृत भाषा में है (सातवीं शताब्दी ई.) आधुनिक विज्ञान सूर्य से लाभदायक ऊर्जा–प्राप्ति के लिए निरन्तर प्रयत्नशील है । सूर्य के ताप से बिजली का उत्पादन होता है । इसकी ऊर्जा से अनेक उपयोगी कार्य किये जा रहे हैं । शीतकाल में निर्धनों की रक्षा सूर्य के ताप से होती है । भोजप्रबन्ध में एक मनोरञ्जक श्लोक है जिसमें एक निर्धन व्यक्ति राजा को बताता है कि उसने शीतकाल कैसे बिताया ।

रात्रौ जानु दिवा भानुः कृशानुः संध्ययोः द्वयोः ।
इत्थं शीतं मया नीतं जानु–भानु–कृशानुभिः ।।

अर्थात् रात में तो मैं दोनों घुटनों (जानु) के बीच मुँह रख कर सोता था । दिन में धूप (भानु) का सेवन कराता था और प्रातः सायं आग (कृशानु) तापता था । इस प्रकार जानु, भानु और कृशानु का सेवन करके मैंने जाड़े की ऋतु बिता दी ।

◆◆◆

# बिहार राजधानी

[प्रस्तुत पाठ में बिहार की राजधानी पटना या पाटलिपुत्र का प्राचीन एवं नवीन महत्त्व बतलाया गया है। गंगा के किनारे लम्बाई में फैला हुआ यह नगर प्राचीन काल में व्यावसायिक केन्द्र तथा प्रशासन के केन्द्र के रूप में प्रसिद्ध था। प्रायः एक हजार वर्षों तक यह सत्ता का अद्भुत केन्द्र रहा था किंतु मध्य काल में इसकी उपेक्षा हो गयी। पुनः इसका महत्त्व मुगलकाल में बढ़ा तथा आधुनिक युग में इसकी चतुर्दिक् उन्नति होने लगी। इस नगर में अनेक प्रसिद्ध भवन तथा दर्शनीय स्थल हैं। गंगा का विशाल पुल इसकी शोभा बढ़ाता है। एक अन्य रेल-सह-सड़क पुल निर्माणाधीन है।]



अस्माकं विहारराज्यम् इतिहासप्रसिद्धमस्ति। बौद्धानाम् आश्रयस्थलरूपेण ये विहाराः निर्मिताः आसन्, तैरेव राज्यस्यास्य नामकरणं बभूव। तथापि इदं नाम प्राचीनं नास्ति। बुद्धस्य समये मगधो नाम महाजनपदः कालेन अतीव शक्तिशाली जातः। तस्यैव राजधानी पुष्पपुरी, कुसुमपुरी, पाटलिपुत्रं वा कथ्यते स्म। अनुगंगम् पाटलिपुत्रम् इति उदाहरणं व्याकरणशास्त्रे प्राप्यते। एतैः नामभिः ज्ञायते यत् अस्मिन् नगरे पुष्पाणां महती समृद्धिः आसीत्। नन्दवंशे मौर्यवंशे च पाटलिपुत्रस्य प्रसिद्धिः विदेशेष्वपि बभूव।

गंगायाः तीरे पोतानां पत्तनम् आश्रयस्थानं वा आसीत् इति पत्तनशब्दात् पटना इति

नाम निर्गतम्। गुप्तवंश-कालेऽपि पाटलिपुत्रं समृद्धमासीत्। चीनयात्रिकः फाह्यानः अस्य समृद्धिं दृष्टवान्। क्रमशः सम्भवतः जलपूरकारणात् नगरस्यास्य पतनं प्रारब्धम्। किन्तु बहुकालानन्तरं मुगलशासनकाले अस्य उद्धारः स्थानमहत्तया जातः। बंगप्रदेशस्य शासनाय अत्र सैन्यशिविरं स्थापितमासीत्।



आंग्लशासनकाले अस्य औद्योगिकं महत्त्वं बभूव। व्यापारस्य उन्नतिः पटनानगरे तत्काले आसीत्। 1912 ई. वर्षे विहारराज्यस्य स्वतन्त्रस्थितिः जाता। तदनु पाटलिपुत्रं पटनेति नाम्ना प्रख्याता राजधानी बभूव। तदनु राजधान्यनुकूलानि भवनादीनि अत्र निर्मितानि। अहरहः नगरस्यास्य उन्नतिः स्थानतः गुणतश्च अजायत। अत्र संग्रहालयः, पुस्तकालयाः, सचिवालयभवनम्, राजभवनम्, तारामण्डलम्, जन्तुशाला, खेलांगनम् (स्टेडियम) इत्यादीनि नवरचनानि सन्ति। गंगातटे गोलगृहं तु (1786 ई०) पूर्वमेव दुर्भिक्षकाले निर्मितमासीत्।

विहारस्य राजधानी सिक्खजनानां दशमस्य गुरोः गोविन्दसिंहस्य जन्मत्वात् (22 दिसम्बर 1666 ई.) अतीव महत्त्वमाप। इदानीं ते विभिन्नेभ्यः स्थानेभ्यः पटनासिटीस्थितं गुरुद्वारानामकं स्थानम् आयान्ति तीर्थयात्रार्थम्। किञ्च जैना अपि सुदर्शनमुनिसमाधिस्थलं

तीर्थयात्रार्थम् आयान्ति। सनातनधर्मस्यापि तीर्थस्थलं पटनदेवी इति वर्तते। पाटलिपुत्रे मोहम्मदानां विविधशिक्षा-प्रदानार्थं मौलाना मजहरुल हक अरबी फारसी विश्वविद्यालयः वर्तते। एवं विहारस्य राजधानी विविधानां धर्माणां समन्वयस्थलं वर्तते।



**शब्दार्थाः –**

| | | |
|---|---|---|
| विहाराः | = | बौद्ध भिक्षुओं के निवास-स्थल |
| बभूव | = | हुआ |
| निर्मिताः | = | बनाए गये |
| एवम् | = | इस प्रकार |
| आसन् | = | थे |
| इंदानीम् | = | इस समय |

| | | |
|---|---|---|
| अतीव | = | बहुत |
| जातः | = | उत्पन्न हुआ |
| अत्र | = | यहाँ |
| अनुगंगम् | = | गंगा के किनारे |
| प्राप्यते | = | मिलता है |
| महती | = | बहुत |
| पोतानाम् | = | जहाजों का |
| पत्तनम् | = | आश्रयस्थान, बन्दरगाह |
| निर्गतम् | = | निकला |
| प्रारब्धम् | = | आरम्भ हुआ |
| तदनु | = | उसके बाद |
| स्थानतः | = | स्थान से |
| दुर्भिक्षकाले | = | अकाल के समय में |
| जन्मत्वात् | = | जन्म होने के कारण |
| आप | = | प्राप्त किया |
| इदानीम् | = | इस समय |
| वर्तते | = | है |
| एव | = | ही |

| | | |
|---|---|---|
| वा | = | अथवा |
| बहुकालानन्तरम् | = | बहुत समय के बाद |

**सन्धिविच्छेद: /पदविच्छेद: –**

| | | |
|---|---|---|
| राज्यस्यास्य | = | राज्यस्य + अस्य |
| तैरेव | = | तैः + एव |
| तथापि | = | तथा + अपि |
| तस्यैव | = | तस्य+ एव |
| विदेशेष्वपि | = | विदेशेषु + अपि |
| निर्गतम् | = | निः+गतम् |
| कालेऽपि | = | काले+अपि |
| प्रारब्धम् | = | प्र+आरब्धम् |
| बहुकालानन्तरम् | = | बहुकाल+अनन्तरम् |
| पटनेति | = | पटना+इति |
| भवनादीनि | = | भवन+आदीनि |
| खेलांगनम् | = | खेल+आंगनम् |
| इत्यादीनि | = | इति+आदीनि |
| निर्मितमासीत् | = | निर्मितम्+आसीत् |

| | | |
|---|---|---|
| महत्त्वमाप | = | महत्त्वम् + आप |
| किञ्च | = | किम् + च |

**प्रकृति–प्रत्यय–विभागः –**

| | | |
|---|---|---|
| जातः | = | √जन् +क्त |
| निर्गतम् | = | निः + √गम् + क्त् |
| आसन् | = | √अस् लङ्लकारः, प्रथमपुरुषः बहुवचन |
| आसीत् | = | √अस् लङ्लकारः, प्रथमपुरुषः एकवचन |
| प्रारब्ध | = | प्र+आ+√रभ् +क्त् |
| आयान्ति | = | आ + √या + लट् लकार, प्रथमपुरुषः बहु |
| अजायत | = | √जन् लङ्लकार, प्रथमपुरुषः एकवचन |

## अभ्यासः
## (मौखिकः)

1. **पाठानुसारम् एकपदेन उत्तरं वदत–**

(क) बौद्धानाम् आश्रयस्थलरूपेण के निर्मिताः आसन् ?

(ख) बुद्धस्य समये कः महाजनपदः कालेन अतीव शक्तिशाली जातः ?

(ग) पाटलिपुत्रनगरे केषां महती समृद्धिः आसीत् ?

(घ) कस्याः तीरे पोतानां पत्तनम् आसीत् ?

(ङ) फाह्यानः कः आसीत् ?

(च) कस्य शासनकाले पाटलिपुत्रस्य उद्धारः जातः ?

**2. अधोलिखितानाम् अव्ययानाम् अर्थं वदत–**

एव, एवम्, अत्र, तत्र, इदानीम्, अपि

**3. निम्नलिखितानां पदानां सन्धिविच्छेदं/पदविच्छेदं वा कुरुत–**

संग्रहालयः, इत्यादि, निर्गतम्, समृद्धमासीत्, महत्त्वमाप

## लिखितः

**1. निम्नलिखितानां पदानां प्रकृति-प्रत्यय-विभागं लिखत–**

(क) जातः (ख) आसीत् (ग) आयान्ति (घ) गच्छति (ङ) पठति

**2. कोष्ठात् चित्वा उचितपदेन रिक्तस्थानानि पूरयत–**

नगरे, विहारराज्यम्, आंग्लशासनकाले, 1912 ई. वर्षे, पाटलिपुत्रम्, फाह्यानः

(क) अस्माकं ................ इतिहासप्रसिद्धमस्ति ।

(ख) अस्मिन् ................. पुष्पाणां महती समृद्धिः आसीत् ।

(ग) .............. विहारराज्यस्य स्वतन्त्रस्थितिः जाता ।

(घ) ................ अस्य औद्योगिकं महत्त्वं बभूव ।

(ङ) चीनयात्रिकः .............. अस्य समृद्धिं दृष्टवान् ।

(च) गुप्तवंशकालेऽपि ................. समृद्धमासीत् ।

**3. अधोलिखितानां पदानां सन्धिं सन्धिविच्छेदं वा कुरुत–**

(क) तैरेव = .................+ ..................

(ख) विदेशेष्वपि = .................+ ..................

(ग) .................. = काले + अपि

(घ) .................. = पटना + इति

(ङ) किञ्च = ...................+ .................

4. **अधोलिखितानां पदानां प्रयोगं वाक्येषु कुरुत–**

अस्माकम्, महाजनपद:, उद्धार:, उन्नति:, अनुगङ्गम् ।

5. **बिहार की राजधानी पटना के बारे में पाठ एवं अपनी जानकारी के आधार पर लिखें।**

6. **सुमेलनं कुरुत**

| | |
|---|---|
| (क) बौद्धानाम् आश्रयस्थलम् | (i) पुष्पपुरम् |
| (ख) पाटलिपुत्रस्य अन्यनाम | (ii) विहार: |
| (ग) गुरु: गोविन्दसिंहस्य जन्मस्थानम् | (iii) राजगृहम् |
| (घ) विश्वशान्तिस्तूपम् | (iv) पाटलिपुत्रम् |

## योग्यताविस्तार

किसी भी राज्य का एक क्षेत्र-विशेष होता है, वह क्षेत्र बड़ा हो या छोटा। उस क्षेत्र के प्रशासक के प्रशासनिक तन्त्र के आवास के लिए जो स्थान निर्धारित होता है उसे "राजधानी" कहते हैं। "धानी" का अर्थ है "स्थान"। प्राचीन काल में राजतंत्र-शासन था, इसलिए प्रशासन के मुख्य अंग राजा के निवास-स्थान को राजधानी कहते थे। कौटिल्य ने "अर्थशास्त्र" में राज्य के सात अंगों की चर्चा की है–स्वामी (राजा), अमात्य (मंत्री), जनपद (भूमि), कोष (खजाना), दण्ड (सेना), दुर्ग (राजधानी) या किला तथा मित्र (सहायक देश)। इनमें दुर्ग ही राजधानी है। इसमें राजा सुरक्षित रहता था। उसके प्रशासनतंत्र के अधिकारी साथ रहते थे। वह एक प्रकार का नगर बन जाता था जहाँ व्यापारी, सैनिक, सेवक, दुकानदार आदि रहते थे। सुव्यवस्थित राजमार्ग होते थे तथा सब की रक्षा के लिए "कोतवाल" होते थे। यद्यपि दुर्ग के अनेक प्रकार बताये गये हैं किंतु आज राजधानियाँ प्राय: समतल स्थानों में आवागमन के साधनों से युक्त होती हैं। राजधानी देश की भी होती है, प्रान्त की भी। छोटी प्रशासनिक इकाइयों का मुख्यालय होता है, जैसे जिला मुख्यालय, अनुमंडल मुख्यालय।

◆◆◆